
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥१३॥

॥श्रीगणेशायनमः॥

आश्वलायन गृह्यपरिशिष्ट

॥१३॥

श्रीगणेशायनमः॥अथाश्वलायनगृह्येयानिकानिचिदन्यत्रोक्ता
नीष्टतामाचार्येणानुमतानिज्ञापितानियानिचोक्तप्रदर्शितक्रि
याणितानिसर्वावबोधाययथावदभिधास्यामः कर्तास्नातोधौता
नार्द्रवासायज्ञोपवीत्याचांतः प्राङ्मुखआसीनोदक्षिणागकारीस
माहितोमंत्रांतेकर्मकुर्वन्शतप्रस्थचेत्किष्टगंतेष्वनादेशआज्यंद्रव्य
स्रुवःकरणमवदानवत्सुदर्वीपाणिःकठिणेषुकर्मांतेतोमंत्रोप्यावर्त्तते
कर्मणोंतआचमनंचेतिमान्यं॥१॥अथसंध्यामुपासीतेत्याचार्यो
यावहोरात्रयोःसंधीयश्चपूर्वाह्नापराह्नयोस्तत्कालभवादेवतासंध्या
तामुपासीतबहिर्ग्रामाद्प्राच्यामुदीच्यांवान्यस्यांदिश्यनिंदितायाम
नल्पमुदकाद्रायमेत्यप्रातःशुचिर्भूत्वापाणिपादमुखानिप्रक्षाल्यशु
चौदेशेभूमिष्ठपादोनपश्रितउपविष्टःशिखांबध्वाआचामेत्त्रकृति
स्त्रमफेनाबुद्बुदमुदकमीक्षितंदक्षिणेनपाणिनादायकनिष्ठांगुष्ठेवि

श्लिष्टे वितत्य तिस्रोत्तरांगुलीः संहतोर्ध्वीः कृत्वा ब्राह्मणतीर्थेन हृदयप्रा
पित्रिः पीत्वा पाणिं प्रक्षाल्य स्पृष्टांभसांगुष्ठमूलेनाकुंचितोष्ठमास्यं द्विः
प्रमृज्य सकृच्च संहतमध्यमांगुलिभिः पाणिं प्रक्षाल्य सव्यं पाणिं पा
दौ शिरश्चाभ्युक्ष्य स्पृष्टांभसा संहतमध्यमांगुलिभिस्त्रयाग्रेणास्यमु
पस्पृश्य सांगुष्ठयात्रदेशिन्या घ्राणबिलद्वयमिनामिकया चक्षुःश्रोत्रे
कनिष्ठिकया नाभिं च तलेन हृदयं सर्वाभिरंगुलीभिः शिरस्तदग्रेणांसौ
चोपस्पृशेदित्येतदाचमनमेवं द्विराचम्यात्मानमभ्युक्ष्य ततो दंतान्धौ
धयित्वा पुनर्द्विराचम्य दर्भपवित्रपाणिः प्रथममंत्रकं पंचदशमात्रि
कं प्राणायामत्रयं कृत्वा समंत्रं सकृत्कुर्यादायतप्राणः सप्रणवां सव्या
हृतिकां सावित्रीं सशिरस्कां त्रिरावर्त्तयेदित्येष समंत्रः प्राणायामः ॥ अ
त्र थ कर्मसंकल्प्य शुचौ पात्रे सव्यपाणौ वापऽआधाय स्थिरे तूदका
न्यियावत्ति कर्म कुर्वत्तावत उदकस्य विभागं कल्पयित्वा तीर्थानि त

त्रावाघृता। आपः सदर्भेण पाणिनादायोत्तानं त्रिः शिरसि मार्जयेदापूर्वं पश्च
आपो हिष्ठेति तिसृभिरथाचमनमुदकमादाय सूर्यश्चेति पिबेत् सूर्यश्च
मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापम
कार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु
यत्किंचदुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि
स्वाहेत्येतत्समंत्राचमनमथ पुनराचम्य मार्जयेत्प्रणवव्याहृतिसा
वित्रीभिर्ऋग्भिः आपो हिष्ठेति सूक्तेन गायत्री। त्रिरसाचांभसात्म
नं परिषिंचेत् तन्मार्जनमथ गोकर्णवत्कृतेन पाणिनोदकमादाय
नासिकाग्रे धारयन् कृष्णवर्णं घोरं पुरुषाकृतिं पाप्मानमात्मान
मंतर्व्याप्य स्थितं विचिंत्य संयतप्राणोऽघमर्षणसूक्तं द्रुपदां मंत्रं वा
वर्तयेद्दक्षिणेन नासाबिलेनानूनैः प्राणं रेचयन् सर्वतस्तेन संहृत्य कृ
ष्णं रेचनं वर्मणा पाणिस्थमुदके पातितं ध्यात्वा तदुकममाणो वेक्ष्य

वामतो भुवि तीव्रपातेन क्षिप्तं तं पाप्मानं वज्रहतं सहस्रधा दलितं भाव
येदेषपाप्मव्यपोहएनमेकेन कुर्वीति मार्जनेनैव तस्य व्यपोहतत्वादि
ति द्रुपदादिवेन्मुमुचानः स्विन्नः स्नात्वा मलादिव ॥ पूतं पवित्रेणेवाज्य
मापः शुंधंतु मैनसइती यं द्रुपदर्कपापनोध्वनं ॥ ॥ अथात्र थाचम्य दर्भ
पाणिः पूर्णमुदकांजलिमुद्धृत्य आदित्याभिमुखस्थित्वा प्रणवव्याहृति
पूर्वया सावित्र्या त्रिर्निवेदयन् क्षिपेद्धि पुनः पाप्मव्यपोहनेच्छ तितेना
नम्येनार्घ्यमुत्क्षिपेयुरेतदेवार्घ्यनिवेदनमसावादित्यो ब्रह्मेति प्रदक्षि
णं परीत्य परिषिंच्याप उपस्पृश्य भुवो देवो दर्भो भसो क्षिते दर्भानास्ती
र्य व्याहृतिभिरुपविश्य प्राणायामत्रयं कृत्वात्मानं व्याहृतिभिरभ्यु
क्ष्य सावित्र्या ऋषिदैवतछंदांस्यनुस्मृत्य तामेतां च चतुरक्षरशो वि
भक्तामन्वितया जितैः षड्भिस्तदंगमंत्रैर्यथांगमात्मनि न्यस्यात्मा
नं तद्रूपं भावयेद्यथा तत्सवितुर्हृदयाय नमः इति हृदये वरेण्यं शिरसे
स्वाहेति शिरसि भर्गो देवस्य शिखायै वषडिति शिखायां धीमहि

॥३॥

कवचायहुमित्युरसि धियो यो नः नेत्रत्रयाय वौषडिति नेत्रे ललाटे च विन्य
स्याथ प्रचोदयादित्यस्त्राय फडिति करतलेरस्त्रं त्राच्यादिषु दशसु दिक्षु न्य
से देषांगन्यास एन मध्ये केनेच्छंति स ऋ विधिर वैदिक मित्यथ मंत्रदेवतां
ध्यात्वागाच्छ वरदे देवी त्यावाह्य तिष्ठं नर्द्ध नेष्टेषु नक्षत्रेषु मामंडल दर्शनान्मंत्रा
र्थमनुसंदधानः संधानं नेच्छंत्येके प्रणव व्याहृति पूर्वकां सावित्रीं जपेज्ज
पंच्याक्षसूत्रेण नाभिकया मध्यमादारभ्य प्रदक्षिणं दशभिरंगुली पर्वभि
र्वा गणायेदागच्छ वरदे देवि जप्ये मे संनिधौ भव॥ गायंतं त्रायसे यस्माद्गाय
त्री त्वं ततः स्मृते त्यावाहन मंत्रः सवितुर्वरेणीयं तेजो ध्यायेम हि यो स्माकं
कर्माणि प्रेरयतीति मंत्रार्थः॥४॥ अथ देवताध्यानं यासंध्योक्ता सैव मं
त्रोक्ता देवता खलूपास्यते तां सर्व दैकरूपां ध्यायेदनुसंध्यमन्यान्य रूपां वा
यदैकरूपा मृग्यजुः साम त्रिपदां तिर्यगूर्ध्वाधः षट्कुक्षिं पंचशी
र्षम् अग्निमुखी विष्णु हृदयां ब्रह्मशिरस्कां रुद्रशिखां दंड कमंडल्वक्ष सूत्रा
भयांक चतुर्भुजां शुभ्रवर्णां शुभ्रांबरानुलेपन स्रगाभरणां शरच्चंद्रसह
स्रप्रभां सर्व देवमयी मिमां देवीं गायत्री मेकामेव तिसृषु संध्यासु ध्यायेदथ

॥३॥

यदि भिन्नरूपांतां प्रातर्बालां बालादित्यमंडलमध्यस्थां रक्तवर्णां रक्तांबरानुले
पनस्रगाभरणां चतुर्वक्त्रां दंडकमंडलुअक्षसूत्राभयांकचतुर्भुजां हंसासना
रूढां ब्रह्मदैवत्यामृग्वेदमुदाहरंती भूर्लोकाधिष्ठात्री गायत्री नामदेवतां युवतीं
युवादित्यमंडलमध्यस्थां श्वेतवर्णां श्वेतांबरानुलेपनस्रगाभरणां पंचवक्त्रां प्र
तिवक्त्रं त्रिनेत्रां चंद्रशेखरां त्रिशूलखड्गखट्वांगडमरुकांकचतुर्भुजां वृषभा
सनारूढां रुद्रदैवत्यां यजुर्वेदमुदाहरंती भुवर्लोकाधिष्ठात्री सावित्री नामदेवतां
ध्यायेदथ सायं तां वृद्धां वृद्धादित्यमंडलमध्यस्थां श्यामवर्णां श्यामांबरानुलेप
नस्रगाभरणामेकवक्त्रां शंखचक्रगदापद्मांकचतुर्भुजां गरुडासनारूढां
विष्णुदैवत्यां सामवेदमुदाहरंती स्वर्लोकाधिष्ठात्री सरस्वती नामदेवतां ध्यात्वा
वजपित्वाथ जातवेदसे सुनवाम सोममित्यृचं येरात्रिणीमहेनमो ब्रह्मणे नमोस्त्व
ग्नये इत्युपस्थाय प्रदक्षिणं दिक्साधिपांनत्वाथ संध्यायै गायत्र्यै सावित्र्यै
सरस्वत्यै सर्वाभ्यो देवताभ्यश्च नमस्कुर्यात् ततउत्तमे शिखरे देवि भूम्यां पर्व
तमूर्द्धनि। ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथासुखमिति संध्यां विसृज्या
भद्रन्नो अपिवातय मन इत्युक्त्वा भूमिं त्रिरुच्चारयन्नमो ब्रह्मणे इति प्रदक्षि

(7)

॥४॥

षंपरिक्रामन्नासत्यलोकादापातालादालोकालोकपर्वतात्ये संति ब्राह्मणा
द्विवास्तेभ्यो नित्यं नमो नमः इति नमस्कृत्य भूमिमुपसंगृह्य गुरून्वृद्धांश्चो
पसंगृह्णीयादेवं सायं विशेषस्तु सूर्यश्चेति मंत्रः सूर्यश्चेति स्थाने अग्नि
श्चवाक्यान्ते रात्रिश्चाहः सत्ये ज्योतिषीति चांते ब्रूयाज्जपश्चार्द्धास्तमित
मंडल आनक्षत्रदर्शनादासीनेस्य थमध्यंदिने त्वापः पुनंत्विति मंत्राचम
नमापः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां ॥ पुनंतु ब्रह्मणस्पतिर्ब्रह्मपू
ता पुनातु मां ॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ॥ सर्वं पुनंतु मामापो
सतां च प्रतिग्रहः स्वाहेत्यथा कृच्छ्री यथाहः सवयावा त्रिः सकृद्वार्घ्यमुद्दि
श्योर्ध्वबाहुरुदन्मुखेव उदुत्यं जातवेदसं चित्रं देवानामिति सूक्ताभ्यां तच्च
क्षुरित्येकया चादित्यमुपस्थाय जपमासीनो यथेष्टकालं कुर्यादित्येष सं
ध्याविधिर्व्याख्यातः ॥५॥ अथास्य मंत्राणामृषिदैवतछंदांसि प्रणव
स्य ब्रह्माग्निर्देवी गायत्री व्याहृतीनां सप्तानां विश्वामित्रजमदग्निभर
द्वाजगौतमात्रिवसिष्ठकश्यपाः प्रजापतिर्वा सर्वासामग्निवाय्वादित्य

॥४॥

(8)

बृहस्पतिर्वरुणेंद्रविश्वेदेवागायत्र्युष्णिगनुष्टुप्बृहतीपङ्क्तिः त्रिष्टुप्जगत्यः स्त्रिसृणा

माद्यानांसमस्तानांवादेवताःप्रजापतिःसावित्र्याविश्वामित्रःसवितागायत्रीशिरसः

प्रजापतिर्ब्रह्माग्निवाय्वादित्यान्यजुंषिछंदरापोहिष्ठासिंधुद्वीपांबरिषआपंगायत्रंद्य

नुष्टुबंतंपंचमीवर्द्धमानांसप्तमीप्रतिष्ठासूर्यश्चब्रह्मासूर्यमन्युमन्युपतयःप्रकृतिरप्

पुनंतुविष्णुरापोष्ठ्यग्निश्चरुद्रोग्निमन्युमन्युपतयःप्रकृतिर्ऋतंमधुछंदसोघमर्षणो।

भावद्वत्तमानुष्टुभंजातवेदसेकश्यपोजातवेदास्त्रिष्टुसछंयोःशंयुर्विश्वेदेवाःशाक्करीन

मोब्रह्मणेप्रजापतिर्विश्वेदेवाजगत्याकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप्हंसःशुचिष

द्वामदेवःसूर्योजगत्युउत्यंप्रस्कण्वःसूर्योगायत्र्यस्याश्वतस्त्रोनुष्टुभःश्चित्रंदेवानांकुत्सःसू

र्यस्त्रिष्टुसच्चक्षुर्वसिष्ठःसूर्यपुरउष्णिगेवमन्यत्रव्यारव्यातं॥६॥अथस्नानविधिःस्नातर्म

ध्यान्हेचग्रहस्थःकुर्यादेकत्रवाप्रातरेवब्रह्मचारीयतिस्त्रिषुसवनेषुद्विस्त्रिर्वानप्रस्थस्त

स्मातःसहगोमयेनकुर्यान्मदामध्यंदिनेसायंशुद्धाभिरद्भिर्नप्रातःस्नानात्प्राक्संध्यामुपा

सीतप्रातरुत्सृष्टं गोमयमंतरीक्षस्थं संगृह्य भूमिष्ठं वोपर्यधश्च संसक्तं तीर्थमेत्य धौत
पाणिपादमुख आचम्य संध्योक्तवदात्माभ्युक्षणादि सर्वं कृत्वा द्विराचम्य दर्भपवित्रपा
णिः संयतः प्राणः कर्म संकल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रि
धा विभज्य दक्षिण भागं प्रणवेन दिक्षु दशसु विक्षिप्योत्तरं तीर्थे क्षिप्त्वा मध्यमं गायत्र्या
भिमंत्रितमादित्याय दर्शयित्वा तेन मूर्ध्नो पादान्गायत्र्या प्रणवेन वा मूर्द्धादि सर्वांग
मनुलिप्य प्रांजलिर्वरुणं हिरण्यशृंगमिति द्वाभ्यामव ते हेळ इति द्वाभ्यां प्रसंम्राजे बृह
दर्चेति सूक्तेन प्रार्थ्य हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः यन्मया भुक्तमसाधू
नां पापेभ्यश्च प्रतिग्रहः यन्मे मनसा वाचा कर्मणा दुष्कृतं कृतं तंन इंद्रो वरुणो बृहस्प
तिः सविता च पुनः पुनरित्यथ याः प्रवतो निवत इत्येतया तीर्थमभिमृश्यावगाह्य स्नातो
द्विराचम्य मार्जयेदंबयो यंत्यध्वभिरित्यष्टाभिरापो हि ष्ठेति नवभिरथ तीर्थमंगुष्ठेन मम
गंगा इत्यृचा त्रिः प्रदक्षिणमालोड्य प्रकाशाष्टेष्टमग्नो घमर्षणसूक्तं त्रिरावर्त्य निमज्योन्म

५

10

यांशंखमुद्रयायोनिमुद्रयाचोदकमादा
ज्यादित्यमालोक्यद्वादशकृत्वाआप्लुत्यपाणिभ्यांशंखमुद्रयायोनिमुद्रयाचोदकमादा
यमूर्ध्निमुखेबाह्वोरुरसिचात्मानंगायत्र्याभिषिंचेत्त्वंनोअग्नेवरुणस्यविद्वानितिद्वाभ्यां
तरत्समंदीधावतीतिसूक्तेनपुनस्नायान्मूर्ध्निवाभिषिंचेत्तद्विष्णोःपरमंपदमग्नेरक्षाणोअं
हसोयत्किंचेदंवरुणदैव्येजनइत्येताजपेत्त्वातोभिमुखःसरित्सुस्नायादन्यत्रादित्यमुखो
थसाक्षताभिरद्भिःप्राङ्मुखउपवीतिदेवतीर्थेनव्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादीदेवा
न्सकृत्सकृत्तर्पइत्वाथोदङ्मुखोनिवीतीसयवाभिरद्भिःप्राजापत्येनतीर्थेनकृष्णद्वैपायना
दीन्ऋषींस्ताभिर्व्याहृतिभिर्द्विर्द्विस्तर्पयित्वाथदक्षिणाभिमुखःप्राचीनावीतीपितृतीर्थेन
सतिलाभिरद्भिर्व्याहृतिभिरेवसोमःपितृमान्यमोंगिरस्वानग्निषात्ताःकव्यवाहनइत्यादीं
स्त्रींस्त्रींस्तर्पयेदेतत्स्नानांगतर्पणमथतीरमेत्यदक्षिणाभिमुखःप्राचीनावीतीयेकेचास्मत्कु
लेजाताअपुत्रागोत्रिणोमृताः तेगृह्णंतुमयादत्तंवस्त्रंनिष्पीडितोदकमितिवस्त्रंनिष्पीड
योपवीत्यप॰उपस्पृश्यपरिधानीयमभ्युक्ष्यपरिधायंद्वितीयंचोत्तरीयंपर्युक्षितंप्रावृत्यद्वि

६

६स्त्रेणादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रेधा विभज्य दक्षिणं भागन×

राचामेदथोक्तसंध्यामुपासीतेतीदं प्रातस्नानविधानं ७ अथमध्यंदिने तीर्थमेत्य
धौतपादपाणिसुखोद्भिराचम्यायतप्राणस्नानं संकल्प्य दर्भपवित्रपाणिः शुचौदे
शेखनित्रेण भूमिं गायत्र्यस्त्रेण खात्वोपरिमृदं चतुरंगुलमुद्धृत्यास्याधस्तान्मृदं तथा खा
त्वा गायत्र्यादाय गर्तामुद्धृतासितायापरिपूर्यं मृदमुपात्तां शुचौ तीरे निधाय गायत्र्या प्रो
क्ष्य तच्छिरसा त्रेधा विभज्यैकेन मूर्ध्ना नाभेरपरेण चाधस्तादंगमनुलिप्याप्सु चाप्युत्प्रक्षा
लयित्वा दित्यं निरीक्ष्य तं ध्यायं स्नायदेतन्मलस्नानमाऊरथ तीरे द्भिराचम्य तृतीयमं
स्त्रेण दिक्षु दशसु विनिक्षिप्योत्तरं तीर्थे क्षिप्त्वा तृतीयं गायत्र्याभिमंत्रितमादित्यायद
र्शयित्वा तेन मूर्ध्ना पादान्गायत्र्या प्रणवेन वा सर्वांगमनुलिप्याप्सु मित्र्यान आपऽओष
धयः संत्विति सह द्भिरात्मानमभिषिच्य दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं
द्विष्मऽ इति मृच्छेषमद्भिः प्रक्षालयेदथ वरुणप्रार्थनादितर्पणांतेनोक्तेन विधिना स्ना
यं नास्मिन्प्राग्ब्रह्मयज्ञतर्पणाद्वस्त्रं निष्पीडयेद्पुत्रादयो ह्यंतेतर्प्यां इत्येष स्नानविधि

६

(१२)

५४ हृदयेपादयो

स्तदेतदसंभवेद्भिरेवंकुर्याद्धौमदिनादिषुचनचगृहेमृदास्नायांनचशीतोदकेनशी
तोष्णोदकेनगृहेस्नायान्मंत्रविधिंवर्ज्जयेद्बहिर्वाप्सुचोदेशेसर्वपश्चात्कुर्यादिति ८
अथाशक्तस्यमंत्रस्नानंप्सुचोदेशेप्सुचिराचांतःप्राणानायम्यदर्भपवित्रपाणिःसव्यपा
णावपःकृत्वातिसृभिरापोहिष्ठीयाभिःपच्छःप्रणवपूर्वंदर्भोदकैर्मार्ज्जयेत्पादयोर्मू
र्ध्निहृदयेमूर्ध्निहृदयेपादयोर्मूर्ध्निचाथऋक्छोहृदयेपादयोर्मूर्ध्निचाथत्र्यृचेनमूर्ध्नि
तिमार्ज्जयित्वागायत्र्यादशधाभिमंत्रिताऽअपःप्रणवेनपीत्वाद्विराचामेदित्येतन्मं
त्रस्नानं ९ अथवैश्वदेवोदिनेस्यप्रारंभोनात्रपाकयज्ञतंत्रमग्निमोपासनंपचनंवापरि
समुह्यपर्युक्ष्यायतनमलंकृत्यासिद्धंहविष्यमधिश्रित्याद्भिःप्रोक्ष्योदगुद्वास्याग्नेःप्रत्य
ग्दर्भेषुनिधायसर्पिषाभ्यज्यसव्यंपाणितलंहृदयेन्यस्यसकृदवदानेनपाणिनाजु
हुयात्सोमायवनस्पतयइत्येकाहुतिर्द्विवाचारिभ्यइतिसर्वभूतानांविशेषणंप्रजापतेरुक्ति
रिष्यतेप्रधानबलेरुदक्पुरुषबलिःस्तदिदमन्नाभावेतंडुलादिभिःकुर्यादेकेनांनेचपरि
समुह्यपर्युक्ष्यदेकेनात्रतंत्रमितिपर्यूहनोक्षणेपिनकुर्वंतिकेवलंकृत्वोपतिष्ठंतेविश्वेदेवाः

४थाऋर्चश्छोमूर्ध्निहृदयेपादयोर्हृदयेपादयोर्मूर्ध्निचा

॥७॥

सर्वेदेवास्ताद्दैवत्यमितीदंवैश्वदेवं ॥१०॥ अथस्वस्तिवाचनमृद्धिपूर्तेषुस्वस्त्ययनंवाचये
दित्याचार्यकृद्धिर्विवाहांता ऽ अपससंस्काराः प्रतिष्ठोद्यापनेपूर्तेतत्क्रमेण आद्यंतयोः
कुर्याद्धुनिस्त्वलंकृतोवाचयित्वातथाभृतेसद्मनिमंगलसंभारसंभृतेयुग्मान्ब्राह्मणान्श्र
द्धस्तानाचारलक्षणंसंपंनान्गंधादिभिरभ्यर्च्यदक्षिणयातोषयेदथप्राङ्मुखाः प्रशस्तां
दर्भपाणयस्तिष्ठेयुस्तद्दक्षिणतोवाचयीतोदङ्मुखः संस्कार्योवाचयीतुर्द्दक्षिणंपार्श्वे
मातिष्ठेयुरथवाचयितादर्भपाणिरपांपूर्णमुदकुंभस्वर्च्चितंसपल्लवमुखंधृत्वातिष्ठन्त्स
माहितोमनः समाधीयतामितिब्राह्मणान्ब्रूयात्समाहितमनसस्मइतितेप्रतिब्रूयुः प्रसी
दंतुभवंतइतिवाचयीताप्रसंनास्मइतीतरेथतेसर्वेसंकृत्सशांतिः पुष्टिस्तुष्टिर्वृद्धिरविघ्नमा
युष्यमारोग्यंशिवंकर्मासिद्धिर्द्धर्मवृद्धिः पुत्रसमृद्धिर्वेदसमृद्धिः शास्त्रसमृद्धिर्धनधान्यसमृ
द्धिरिष्टसमृद्धिरित्येतानिपंचदशपर्यंतान्येवोत्क्वातंनाम्नाकर्मदेवताः प्रियंतामितिब्रूयुरथ
त्रि वाचयीतापूर्वेतत्तल्लिंगमंत्रान्यद्वित्वाँस्त्रिर्मंद्रमध्यमोच्चस्वरैरोंपुण्याहंभवंतोब्रुवंतोंस्वस्तिंभवं
तोब्रुवंतोंऋद्धिंभवंतोब्रुवंत्वितिब्रूयात्तेपितथाप्रत्येकंप्रतिब्रूयुरोमृध्यतामित्यृद्धौप्रतिब्रूयु
रथप्राङ्मुखमासीनंसामात्यंकर्त्तारंब्राह्मणाः सपल्लवदर्भपाणयः शांतिपवित्रलिंगाभिरभिषिंचेयुः

७ ॥७॥ ॥७७॥

अथ होष्यन्होमे किंचिदुच्छ्रिता समालक्षिता भूमिः स्थंडिलमुच्यते तदिषुमा
त्रावरं सर्वतो गोमयेन प्रदक्षिणमुपलिप्य यज्ञियशाकलमूलेनोल्लिख्य शाक
लं प्रागग्रं निधाय स्थंडिलमभ्युक्ष्य शाकलमाग्नेय्यां निरस्यापउपस्पृशे
देष आयतनसंस्कारस्तत्राग्निं व्याहृतिभिरभ्यात्मानं प्रतिष्ठाप्यान्वादध्या
ति कर्म संकल्प्य पुरःसरं द्वयोस्तिसृणां वा समिधमभ्याधानमन्वाधान
मथेध्माबर्हिषि संनह्य दर्भैः प्रादेशमात्रैस्त्रिसंधी त्रिवृतो रज्जुं कुर्यादि
त्थं रज्जुकरणं प्रथमां रज्जुमुदकपाणिभ्यां सव्योत्तराभ्यां पूर्वं वर्त्तयेत्त
तो दक्षिणोत्तराभ्यां मते प्रदक्षिणावृत्तं ग्रंथिं कुर्यादेतद्रज्जुकरणं प्रथ
मां रज्जुमुदगग्रामास्तीर्य प्रादेशमात्रं दर्भमुष्टिं छित्त्वा प्रागग्रं तस्यां नि
धाय तया बर्हिर्द्विरावेष्ट्य तन्मूलं च सकृदावेष्ट्य तां प्रथमवेष्टनस्याध
स्तादुन्नयेदेवं द्वितीययेध्मं सकृदावेष्ट्य संनह्येदरत्न्यायाम इध्मः पंचद
शदारुकास्तदुपरि निदध्यादेतदिध्माबर्हिषोः संनहनमथ सोदकेन पा
णिना प्रागुदीच्यामारभ्य प्रदक्षिणमग्निं त्रिः परिसमुह्य प्रादेशमात्रैर्दर्भैः

15

प्रदक्षिणंप्राच्यादिषुप्रतिदिशमुदक्संस्थंपरिस्तरणीयात्दक्षिणोत्तरयोःसंधिषुमूला
ग्रैश्छादयेद्ब्रह्माधिष्ठानादग्नेर्दर्भांस्तिर्यक्स्तरणीयादुत्तरतःपात्रासादनार्थंदक्षिणा
तोब्रह्मासनायचकांश्चिद्दर्भानास्तीर्याग्निंपर्युक्षेदेषोग्निसंस्कारोऽथ
तेषुदर्भेषुपात्राणिन्यग्बिलानिद्वंद्वंप्रागुदगपवर्गंप्रयुनक्तिप्रोक्षणपात्र
स्रुवौचमसाज्यपात्रेचेध्माबर्हिषीचेत्साज्यहोमेषुचरुस्थालीप्रोक्षणा
पात्रेदर्वीस्रुवौचमसाज्यपात्रेचेध्माबर्हिषीचेतिदर्वीहोमेषुप्रोक्षणा
पात्रमुद्धृत्यपवित्रेंतर्धायापआसिच्यतूष्णींताःपवित्राभ्यांनिरुत्पूयपा
त्राण्युत्तानानिकृत्वेध्मंविस्रस्यपात्राणिताभिरद्भिस्त्रिःप्रोक्षेदेतत्पात्रा

अथ

सादनं॥१२॥चमसंप्रस्यगग्नेर्निधायतेपवित्रेंतर्धायाद्भिःपूरयित्वा
गंधादिप्रक्षिप्यदक्षिणोत्तराभ्यांनासिकांतमुद्धृत्योत्तरतोग्नेर्दर्भेषु
निधायदर्भैःप्रच्छादयेदेतत्प्रणीताप्रणयनमथतेएवपवित्रेआज्यपा
त्रेंतर्धायाज्यमासिच्यांगारानुदगपोह्यतेष्वाज्यमधिश्रित्यसोल्मुके

नावज्वाल्यदर्भाग्निप्रक्षिप्य प्रोक्ष्याग्नौ प्रास्य ज्वलन्तात्ते नैवोल्मुकेनाज्यं त्रिः प
रिहृत्योल्मुकं निरस्यापउपस्पृश्याज्यं कर्षन्नुदगुद्वास्यांगारानतिसृज्याज्य
मुत्पूय पवित्रे प्रक्षाल्याग्नौ प्रास्योपस्पृशेदेष आज्यसंस्कारोऽथ बर्हिरास
नोऽग्नेः प्रागग्रमास्तीर्य तत्राज्यमासाद्य सदर्भौ दर्विस्रुवावादायाग्नौ प्रता
प्य दर्विं निधाय स्रुवं सव्येन धारयन् दक्षिणेन पाणिना दर्भाग्रैर्बिलं प्राग
पवर्गं त्रिः सम्मृज्य तैरेव बिलपृष्ठमभ्यात्मं त्रिः सम्मृज्याथ पृष्ठादारभ्य या
वदुपरि बिलं दंडं दर्भमूलैस्त्रिः सम्मृज्य स्रुवं प्रोक्ष्य प्रताप्योदगुद्वास्य बर्हि
ष्यासाद्योदकपृष्ठे स्तैरेव दर्भैरेवं दर्विश्च संस्कृत्य स्रुवादुदक् निधाय दर्भान्
प्रोक्ष्याग्नौ प्रहरेदेष स्रुक्स्रुवसंमार्गः ॥४३॥ ब्रह्मा चेत् क्रियेत स प्राक् प्रणी
ताप्रणयनात् समस्तपाण्यंगुष्ठो भूत्वाग्रेणाग्निं परीत्य दक्षिणत आस्ती
र्णेषु दर्भेषु निरस्तः परावसुरिति तृणमंगुष्ठोपकनिष्ठिकाभ्यां निर्कृत्य
निरस्यापउपस्पृश्येदमहमर्वावसोः सदने सीदामीत्युदङ्मुख उपविश्य
बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स

यज्ञपतिं पाहि समां पाहीति मंत्रं ब्रह्मा जपेत् प्रणयने ब्रह्मजपः प्रणेष्या
मीत्युक्ते तिष्ठ भूर्भुवः स्वर्बृहस्पतिप्रसूत इत्युक्ते प्रणयेति प्रसूति स्थे
त्सर्वदा च यजमानाभवे देके नैतदिष्यन्ते निरसनमुपवेशनं जपः प्रायश्चि
त्तहोमः संस्थाजपेनोपस्थानं चेति पंचकर्माणि ब्रह्मणः ॥१७॥ अथ
पार्वणस्थालीपाकस्यैते पौर्णमास्यामारंभोऽग्निरग्नीषोमौ च पौर्ण
मास्यां देवतेऽग्निरिंद्राग्नी चामावास्यायामपः प्रणीय शूर्पे व्रीहीन्निरु
प्य प्रोक्ष्य प्राग्नीवमुत्तरलोमकृष्णाजिनमास्तीर्य तत्रोलूखले निधाय
तानवघ्नंस्तंदुलांस्त्रिः फलीकृतांस्त्रिः प्रक्षाल्य श्रपयेद्यदि सह श्रपये
च्चरुं निरुप्येदममुष्मा इदममुष्मा इत्यभिमृश्य स्विष्टकृतं द्विरुपरिष्टा
दभिघारयेत्संचावत्ती द्वावत्ता पुरस्तादच्चये दिध्म रज्जुं विस्रस्याग्नेरोमा
स्योपस्थ्यायाया आग्नेयस्य तोदे वाहूदं विष्णुरित्येताभिर्व्याहृतिभिश्च
जुहुयादेताः समस्तसर्वप्रायश्चिताहुतय एता ब्रह्मणा कर्तव्याः परीत्य प्रा
गुदीच्यामवस्थाय जुहुयादथ बर्हिषि पूर्णपात्रं निनीय तत्राभिरद्भिर

(18)

यो अस्मान्मातरः शुंधं त्विदमापः प्रवहते सेताभ्यां सुमित्र्यान आप ओषध
यः संत्विस्यैने नद्यात्मानं शिरसि मार्जयेत्तं संस्कार्यान पि संस्कार कर्मस्वथाग्नि
मोञ्च मद्भूति संस्रु जपेनोपतिष्ठेत ततो ब्रह्माथ कर्त्ताग्नेः परिसमूहनपर्यु
क्षणे कुर्यादेतद्देवतेत्र मन्येषामस्थाली पाकवत्कृतत्कृतं भंगुजयादू ॥१५॥
अथ नित्योपासनं तस्य सायमारंभो न स्तमित आदित्ये सायमग्नेः प्रादुष्कर
णमनुदिते प्रातः प्रदोषांतः सायंहोमकालः संगवांतः प्रातर्नातित्रेतं त्र भि
ष्यते ग्निं परिसमूह्य परिस्तीर्य पर्युक्ष्य होम्यमपक्वमुल्मुकेनावज्वाल्य तेने
वत्रिः परिहृत्योल्मुकं निरस्येत्सक्कमुदगंगारेषु धिश्रित्य प्रोक्ष्योदगुद्वास्य
तानंगारानतिसृजेद् एष होम्यः संस्कारः पयो दधि सर्पिर्यवागूरोदनस्तंडुलाः
सोमस्तैलमापो व्रीहियवास्तिलाहुतिहोम्यानि तंडुलानि वार श्यामाकया
वनालानां व्रीहिशालियवगोधूमप्रियंगवः स्वरूपेणापि होम्यास्तिलाः स्व
रूपेणैव कृतं चतुःषष्टिर्वाहुतिर्व्रीहितुल्यानं तदर्द्धं तिलानां तदर्द्धं सर्पिस्ति
लयोस्तैलं च तिलजं तिलातसीकुसुंभानां चेन प्रथमाहुतिं जुहुयात्तेने

19

वद्दितीयांजुहुयाद्येनचसायंजुहुयात्तेनैवप्रातःसायंप्रातर्होमौसायंवा
समस्येन्नतुप्रातःसायंहोमौ ॥१६॥ अथपुनराधानमनुगताग्नेर्विच्छि
ष्टागारादानीयोक्तवदुपसमाधायपरिसमुह्यपरिस्तीर्यपर्युक्ष्याज्य
मुत्पूयायाश्चाग्नश्चेत्येकां हुतिंहुत्वाययथापूर्वंपरिचरेदेवमाद्
द्दशरात्रादत्तूर्ध्वंविवाहगृहप्रवेशहोमाभ्यामेकतंत्राभ्यामाद्ध्यो
तत्रविवाहज्यालाजाहुतयोगृहप्रवेशाज्याहुतयोहृद्यांजनंचभ
वतिकर्त्तैवलआनावपस्येत्पुनराधानेनित्यहोममतीत्यमनस्वत्या
चतुर्गृहीतंजुहुयाद्द्वादशरात्राद्दूर्ध्वंपुनराधानमेवकुर्यात् ॥१७॥ अ
थानेकभार्यस्ययदिपूर्वंगृह्याग्नावेवानंतरोविवाहःस्यात्तेनैवसातस्य
सहप्रथमयाधर्माग्निर्भार्याभवतियदितुलौकिकेपरिणयेत्तमेवपश्चि
गृह्यपूर्वेणैकीकुर्यात्तोपस्थगुपसमाधायपूर्वस्मिन्पूर्वयापत्न्यान्वारब्धो
ग्निमीळेपुरोहितमितिसूक्तेनत्र्यृचंहुत्वोपस्थायायंतेयोनिर्ऋत्वि

२०

यइतितंसमिधमारोप्यग्रस्यवरोहेति द्वितीये वरोह्याज्यभागांतंकृत्वा भाभ्या
मन्वारब्धोजुहुयादग्निनाग्निः समिध्यतेत्वंह्यग्ने अग्निनासौनोअग्नए
कयेति तिसृभिरास्तीदमधिमंथनमिति चतसृभिरथैनंपरिचरेन्न
तामनेन संस्कुर्यान्यथा पुनरादध्याद्द्विताग्निं विभज्य तद्भागेन संस्कु
र्यादेकीनामप्येवमग्निसंयोजनं कुर्यात्कौ मिथुनं दक्षिणा ॥१८॥ अथ
कन्यावरणं कन्यां परिणेष्यमाणो दैवज्ञचतुराष्टौ वा वरपितृनाम्नाप्रशस्ताका
र कर्मणोऽन्त्यक्षराज्जवः संतु पंथा इति प्रहिणुयादेतावतीभिः पुरंध्रीभिः
सहितां मंगलगीततूर्यघोषाभ्यां कन्यागृहमेत्य शुभे पीठासने प्राङ्मु
खासीनायाः सदाप्तज्ञातिबांधवायाः कन्यायाः पाणौ फलं प्रदाय कन्या
वरणकाले वृणीरन्नासीनाः प्रत्यङ्मुखा वसिष्ठगोत्रासन्नायामुष्यप्रपौ
त्रायामुष्यपौत्रायामुष्यपुत्राय श्रुतशीलनाम्ने वराय वत्सगोत्रोद्भवाम
मुष्यप्रपौत्रीममुष्यपौत्रीममुष्यपुत्रीं सुशीलानाम्नीमिमां कन्यां भा
र्यत्वाय वृणीमह इति ब्रूयुरथ दाता भार्यां ज्ञातिबंधुसमेतायथोक्तम

हि

(21)

॥११॥

नूखरणीध्व मि तिब्रूयादेवं त्रिः प्रयुज्य दाता प्रदास्यामीति चोच्चैः स्त्रिः प्रब्रू
याद थ ब्राह्मणा उक्तस्वस्त्ययना शिवा आपः संतु सौमनस्यमस्त्वक्षतं चारि
ष्टं चास्तु दीर्घमायुरस्तु शांतिः पुष्टिश्चास्त्वित्युक्ते तत्सत्यमस्त्विति त्रिरनूध
समानीव आकूतिः प्रसुगमंता व्रियसानस्य सक्षणीत्येताः पठेयुः पुरंध्र
यः कन्यायै कल्याणान्कुलधर्मोपचारान्कुर्युः ॥३९॥ अथोपयमनं लक्ष
ण्यो वरो लक्षणवतीं कन्यां च यवीयसीमसपिंडामसगोत्रजामविरुद्धसं
बंधामुपयच्छेत पितृतः सप्तपुरुषं सापिंड्यं मातृतः पंचपुरुषं भृगवश्चांगि
रसश्च प्रवरेषु विकर्षयोगः सगोत्रा एकार्षा दूतरे दंपत्यो मिथः पितृमातृ
साम्ये विरुद्धः संबंधो यथा भार्यास्वसुर्दुहिता पितृपत्न्याः स्वसा चेति केचि
न्मातृगोत्रजां च निषेधंति तदपत्यमसगोत्रस्यादिति सुस्नातोऽलंकृतो वरः
स्वस्ति वाचयित्वा सहितः स्वर्चितैर्ब्राह्मणैः पुरंध्रीभिर्ज्ञातिबांधवैः पदाति
भिर्मंगलगीततूर्यघोषाभ्यां संबंधिनो गृहमेत्य चतुष्पदे सोत्तरच्छदे ल
क्षितदर्भास्तीर्णे भद्रपीठे प्राङ्मुख उपविष्टोऽन्तस्य पुरस्तात्प्रत्यङ्मुखी भ

२०

११

डुपीठासीनां सुस्नातालंकृतामहतवाससंस्रग्विणीं कन्यां पुरस्कृत्य दातास्म
मात्यउपविश्य दद्वरं विधिवदद्भिरभिषेचयेदथदक्षिणतः पुरोधाउदङ्मुखउप
विश्य मध्ये प्रागग्रोदगग्रनानूदर्भानास्तीर्य तैजसमपांपूर्णं कलशं निधाय व्री
हियवानोप्यगंधादिभिरलंकृत्य दूर्वापल्लवैर्मुखमवस्तीर्याछिन्नाभिर्नुं गिभि
रभिमंत्र्य ताभिरद्भिः प्रयोजयेदथदाता पुण्याहादीनि वाचयित्वा द्विवा ॐ आ
पः संतु सौमनस्यमस्त्वक्षतं चारिष्टं चास्तु दीर्घमायुरस्तु शांतिः पुष्टिस्तुष्टि
श्चास्त्विति थिकर्णमुहूर्तनक्षत्रसंपद स्विस्त्युक्त्वा भार्यादिसमेतः कन्यां प्रति
गृह्य वत्सगोत्रोद्भवामनुष्यप्रपौत्रीममुष्यपौत्रीममुष्यपुत्रीं सुशीलानाम्नीं
कन्यां वसिष्ठगोत्रोद्भवायामुष्यप्रपौत्रायामुष्यपौत्रायामुष्यपुत्राय श्रुतशी
लनाम्ने वराय संप्रददे कन्यां प्रतिगृह्णातु भवानिति ब्रुवन्वरस्य पाणौ हिरण्य
मुपधाय कलशोदकधारामासिंचेन्मनसा प्रजापतिः प्रीयतामिति ब्रूयाद
थ वरः पुण्याहादीनि वाचयित्वा दक्षिणांसे कन्यामभिमृश्य क इदं कस्मा
दात्कामः कामायादात्कामो दाता कामः प्रतिगृहीता कामं समुद्रमाविश
कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददात्विति जपित्वा प्रजा

२३

॥३२॥

पतिमनुस्मृत्य धर्मप्रजायासिध्य र्थं कन्यां प्रतिगृह्णामीति ब्रूयादेवं च्चिः प्र त्युक्ते पुरोधास्तु वरोपस्थस्तस्य हिभुरुषः संतिपूर्वकारि ति तिस्रो जपित्वोत्त स्त्यम ह्मिमस्त्वि ति ब्रूयात् ॥२०॥ अथानयोर्निरीक्षणं स्वलं हृतेवेश्मनि मं गलगीततूर्य निर्घोषेपूर्वापरो चरणभितोरुस्तांतराले शुक्लतंडुलराजी कृ त्यामध्येस्वस्तिकांकां तिरस्करणीं धारयेयुरथ पूर्वस्मिन् राज्ञौ प्रत्यङ्मुखीं गुडजिरकपाणिं कन्यां स्थापयेयुरपरस्मिन् प्राङ्मुखं तथाभूतं वरं तौ मन स्येष्टदेवतां ध्यायंतौ समाहितौ तिष्ठतां ब्राह्मणाः सूर्यासूक्तं पठेयुः पुरंध्र्यो मंगलगीतान्कुर्युरथतस्मिन्काले प्रविष्टे सद्य स्तिरस्करणी मुदगपसा र्य कन्यावरोपरस्मिन् कुडजीरकान वकिरतः परस्परं च निरीक्षेयातामभ्रा तृघ्नीमिति तामीक्षमाणो जपत्यघोरचक्षुरपतिघ्न्येधीति तं यक्षमाणो था स्याश्च वो मध्ये व्याहृतिभिर्दर्भाग्रेणापरिमृज्य दर्भं निरस्या पउपस्पृश्य दथ ब्राह्मणा बंधवः पुरंध्र्यस्ताबाक्षीभिर्नंदयेयुः ॥२१॥ अथानयोरार्द्राक्षतारो पिणं तेजसा न पात्रेणाक्षीरमानीय घृतमासिच्यान्येनार्द्राक्षततंडुलानय यथा स्थितयोर्वधूवरयोः कर्मैतत्कारयेयुरमृतं क्षीरमायुर्घृतमरिष्टम

॥३३॥

१२

दथदातास भार्यैर्विप्राः पुरंध्र्यो ज्ञातिबांधवाश्च क्रमादार्द्राभिरार्द्राक्षतारो
पणं कुर्युः ॥ २२ ॥ अथर्त्तुमत्याः प्राजापत्यमृतौ प्रथमेनुकूले ह्नि सुस्नात
यान्वारब्धः प्राजापत्यस्य स्थालीपाकस्य हुत्वा आज्याहुती र्जुहुयाद्वि
ष्णुर्योनिमिति तिस्रो नेजमेषेति तिस्रः प्रजापते न त्वदेताभित्येकायतां मू
र्ध्न्यपनः शोशुचदघमिति सूक्तेनाभिमन्त्र्य याः फलिनीर्या अफला इति
जपित्वा बध्येन दस्युं प्रहिन्वातयस्वेति षड्भिरग्निस्तु विश्रवस्तममिति तु द्वा
भ्यामग्निमुपस्थाय सूर्यो नो दिवस्पात्विति सूक्तेनादित्यमुपतिष्ठेत ॥ २३ ॥
अथ गर्भलंभनमृतावनुकूलायां निशि स्वलंकृते सुगंधवासिते वेश्म
नि तामासने पर्यंके शयने सुस्नातालंकृतां शुक्लवसनां स्रग्विणीं भार्यां
स्वयं तथाभूतो निवेश्य दूर्वाः पिष्ट्वाश्वगंधं वा सूक्ष्मेण वाससा संगृह्यादि
र्वातः प्रतिवतीति द्वाभ्यां स्वाहाकारांताभ्यामुभयोर्नासिकाबिलयोर्नि
षिंच्य संवेश्य गंधर्वोसि विश्वावसुर्मुखमसीत्युपस्थमभिमन्त्र्य विष्णुर्यो
निं कल्पयत्विति द्वाभ्यां विहृत्य यो गर्भमोषधीनां गर्भमदधामोषधी

28

॥१३॥

क्षताक्षतएवतासामारोपणमिष्यतेवरःप्रक्षालितपाणिर्वध्वाःप्रक्षालितं
जलोक्षीरघृतंपाणिनाद्विरुपस्तीर्यद्विस्तंडुलानंजलिनावपतियथापूर्येततत्तो
द्विरुपरिष्टादभिघारयेसेवंवरांजलावन्यस्तंडुलपूरणंकुर्याद्दाताकन्यातार
यतुदक्षिणाःपांतुबहुदेयंचास्तुपुण्यंवर्द्धतांशांतिःपुष्टिस्तुष्टिश्चास्तुतिथि
करणमुहूर्त्तनक्षत्रसंपदस्त्वित्युक्त्वाकन्यामुत्क्षिप्यतदंजल्यक्षतावरमूर्ध्न्या
रोपयेद्वरोपितन्मूर्ध्निस्वांजल्यक्षतानारोपयेदेवंत्रिर्वरपूर्वंवरांजलौवधूस्तंडु
लपूरणंकुर्यात्तदंजलावन्यद्वरानीदातावरायगोभूदासीयानद्रव्यनामन्त्रादि
कमनुदानंदद्यादथपुरोधाःकांस्यपात्रेआसिच्योदुंबर्यार्द्रयाशाखयासपला
श्यासहिरण्यपवित्रयासदूर्वापल्लवयाभिषिंचेद्वहितिभिर्ऋग्भिरथवधूव
रौस्वकरेखरपुष्पंक्षीरघृतेनाप्लाव्यपरस्परतिलकंकुरुतःकंठस्रजंचामुंचतः
कौतुकसूत्रंचकरेबध्नीयातामथपुरोधास्तयोरुत्तरीयांतयोःपंचपंचपूगफ
लानिविवाहव्रतरक्षणंगणाधिपमनुस्मृत्यगणानांत्वागणपतिंहवामहइ
त्यादृनहृदक्षुमंतमितिचवध्वोत्तरीयांतेचनीललोहितंभवतीतिबध्नीया

क्षताञ्जतएवतासामारोपणमिष्यतेवरःप्रक्षालितपाणिर्वध्वाःप्रक्षालितं
जलाद्रीरचितंपाणिनाद्विरुपस्तीद्विस्तंदुलानंजलिनावपतियथापूर्येततो
द्विरुपरिष्टाद्भिघारयसेवंवरांजलावन्यस्तंडुलपूरणंकुर्याद्दाताकन्यातार
यतुदक्षिणाःपांतुबहुदेयंचास्तुपुण्यंवर्द्धतांशांतिःपुष्टिस्तुष्टिश्चास्त्विति धि
करणमुहूर्तनक्षत्रसंपदस्त्वित्युक्त्वाकन्यामुक्षिप्यतदंजल्यक्षतावरमूर्ध्नि
रोपयेद्वरोपितन्मूर्ध्निस्वांजल्यक्षतानारोपयेदेवंत्रिर्वरपूर्ववरांजलौवधूस्तंदु
लपूरणंकुर्यात्तदंजलावन्यद्दत्वानींदातावरायगोभूदासीयानन्यायनामन्त्रादि
कमनुदानंदद्यादथपुरोधाःकांस्यपात्रेआसिच्योदुंबर्यार्द्रशाखयासपला
शयासहिरण्यपवित्रयासदूर्वापल्लवयाभिषिंचेद्धिरण्यगर्भिर्ऋग्भिरथवधूव
रौस्वन्योरवरपुष्पंस्रजंरचितेनाप्लाव्यपरस्परंतिलकंकुरुतःकंठस्रजंचामुंचतः
कौतुकसूत्रंचकरेबध्नीयातामथपुरोधास्तयोरुत्तरीयांतयोःपंचपंचपूगफ
लानिविवाहव्रतरक्षणंगणाधिपमनुस्मृत्यगणानांत्वागणपतिंहवामहइ
त्यातृनंडदक्षुमंतमितिचबध्वोत्तरीयांतोचनीललोहितंभवतीतिबध्नीया

क्षितिं जपित्वोपगच्छेत्प्राणेरेतो दधाम्यसावित्यनुप्राण्याद्यथा भूमिरग्निगर्भा
यथा द्यौरिंद्रेण गर्भिणी॥ वायुर्यथा दिशां गर्भ एवं ते गर्भं दधाम्यसावित्यभि
मन्त्र्यैक उपगमने मंत्रविधिमिच्छंति नयनेन किंचित्संस्त्रियत इति तत औ
षधिनिषेकं कृत्वोपगच्छेदिति॥२४॥ अथ जातकर्म पुत्रे जाते पुराण्यैरालंभाद
ग्निरिंद्रः प्रजापतिर्विश्वेदेवा ब्रह्मेत्यनादेशे देवता हुत्वा प्राक्स्विष्टकृतः सर्पि
र्मधु हिरण्यप्राशनादि कुर्यादेवं निष्क्रमणं तच्चतुर्थे मास्यापूर्यमाणपक्षे पुण्य
नक्षत्रे स्वस्ति वाचयित्वा स्विष्टकृतः प्राक् सुस्नातोऽलंकृत्य कुमारमादाय स
ह भार्ययानुज्ञातिबांधवैः पुरंध्रीभिश्च मंगलतूर्यघोषेण गृहान्निष्क्रम्य देवताय
तनमध्ये स्वदेवतामुपहारेणागृहमुपयच्य ब्राह्मणान्वाचयित्वाऽयतनं प्रद
क्षिणं प्रकृत्य गृहमियात्तां बधिगृहं वानीयानयेदेवमन्नप्राशनादावपीष्टा
यामनादिष्टे देवताय ष्टव्या यष्टव्या॥२५॥ इत्याश्वलायनगृह्यपरिशिष्टे प्रथ
मोध्यायः॥ अथ गृह्यं यत्र श्वैत्यं यत्र श्वित्यमुपयन्त श्वित्तमुच्येत तत्र भवा
नां तिपुष्टिदेवता श्वैत्याहुतिं खलु पुष्टिं च सर्वे गृह्याः समुपयान्ति तेते तत श्वे

२८

॥१५॥

स्याः आदित्यश्चंद्रोंऽगारकः सौम्यो गुरुः भार्गवः शनैश्चरो राहुः केतुरिति नवग्र
हास्ते हि स्वस्वगत्या जगदभिगच्छंतीति तानयनादिष्टपुण्यकालेषु यजेत ग्रा
मे वा यदि संयतो भवतः तेषु मांगल्यादिष्वाभ्युदयिकं करिष्यमाणो नु ग्रहयज्ञं कुर्यात् ॥ दि
नाभ्युदयिके हि ग्रांतिकर्म यदितदानुकूल्यकामः कामं प्रागभ्युदयात्तत्प्र
हांतरिता कुर्यात्तं तद्रूपराहुतिः स्वयमेकः कुर्यादूर्ध्वमापञ्चाराच्चत्वार ऋत्वि
जः स्युरानूतवरमष्टौ नवम आचार्यः स स्वयमेव वा यदि स्वयमाचार्यः स्यात्तत्त्रज्ञं
गं कल्पविदं दध्यात्ता न्वि ध्यिवद्वरयित्वा हि यदाचार्य आदित्याय जुहुयादितरे भ्य
स्तेर पूर्वीन्तरं तत्रमाचार्यः कुर्यात्तन्मिन्तरे न्वारभेत ॥ ३ ॥ अथास्य संभाराः ह
स्तमात्रावरं चतुरस्रं कुंडं स्थंडिलं वा संस्कृत्य तत ईशान्यां कुंडवदायतचतुर
स्रां चतुस्त्र्यंगुलोच्छ्रितं भूमिकां मृदुवेदिं कुर्यात्तस्यां च शुक्लैस्त्रीहितंदुलैः
सकर्णिकमष्टदलमंबुजमुद्धृत्य समुखाकर्णिकायां दलेषु च यथास्थानं ग्र
हपीठानि स्थापयेद् दुर्दीच्यां धान्यपीठे तैजसं मृन्मयं वा नवमनुलिप्तालंकृ
तमुभयमक्षिपकं कुंभं निधाय यावत्प्रवतद्भ्यसनया शुभाद्भिः पूरयित्वा

(२९)

॥३६॥
राम

पंचगव्यानि पंचामृतानि नवपर्वतधातून्नवपवित्रमृदो नवरत्नानि प्रक्षिप्य दूर्वाप
ल्लवैर्मुखमवच्छाद्य वस्त्रयुग्मेन वेष्टयित्वा समुद्रादीनि पुण्यतीर्थान्यावाह्य कुंभम
भिमंत्र्य वारुणीः पावमानीश्च जपेत्॥ ॥ अथार्चनांगानि ताम्रं स्फाटिकं कौर
क्तचंदनः सुवर्णं तद्वद्रजतं लोहं सीसकं कांस्यमिति नवप्रतिमाद्रव्याणि सुव
र्णमेकमेव वा सर्वेषां रक्तचंदनो मलयजो देवदारुः कुंकुमो मनःशिला भूरवपिष्ट
तिलपिष्टं केतकीरजः कस्तूरीति नवानुलेपनानि मलयजमेव वा रक्तपद्मं कु
मुदं रक्तकरवीरपाटलं चंपकं कुंदमिंदीवरं कृष्णधत्तूर श्वेतवर्णमिति नवपुष्पा
णि मल्लिकाचंपकपुष्पमेव वा रक्तवस्त्रयुग्मानि च कुंदमयूरशिखादूर्वांगं सर्जर
सो बिल्वफलं श्रीवासं कृष्णागरु जटामांसी मधुकमिति नवधूपा गुग्गुलुरेक एव
वा सर्पिर्वा दीपस्तिलतैलेन वा हविष्यान्नं पायसं पललान्नं गुडान्नं क्षीरौदनो द
ध्योदनः कृसरो माषान्नं चित्रान्नमिति नवोपहाराः स्विष्टदन्नमेकमेव वा माणि
क्यं मौक्तिकं प्रवालं मरकतं पुष्परागो वज्रो नीलो गोमेदिकं वैडुर्यमिति नवरत्ना
न्येकमेव वा माणिक्यमर्कः पलाशः खदिरोऽपामार्गोऽश्वत्थ औदुंबरः शमी दूर्वाः

कुर्यादुत्तिनवसमिधः सर्वेषांपलाशाएकएववा ॥ ॥ अथार्चनमाचार्यः प्राङ्मुख
उपविश्यसमाहितः पुण्याहंवाचयित्वाकर्मसंकल्प्यग्रहवेद्यांपश्चिमे पीठेषु य
थास्थानमुखीग्रहप्रतिमास्थापयित्वादक्षिणवामयोरधिदेवताप्रत्यधिदे
वतेतदभिमुख्योस्थापयेदभावेपुष्पाक्षतादिष्वावाहयेदग्निरापः पृथिवीविष्णुरि
न्द्रइन्द्राणीप्रजापतिः सर्पाब्रह्माचग्रहाणामधिदेवतारुद्रोगौरीस्कंदः पुरुषोब्र
ह्मायमः कालश्चित्रगुप्तइतिप्रत्यधिदेवतागणपतिंदुर्गांक्षेत्रपतिंवायुमाकाश
मश्विनौकर्मसाद्गुण्यदेवताःक्रमायथाप्रत्यदिक्षुवैपूर्वप्राच्यादिदिक्षुइन्द्रादीन्लोक
पालान्क्रतुसंरक्षकानावाहयेत्सुपांडलिकेग्रहाणामावाहनमंत्रैरावाहनमंतै
र्नामभिःकेनचिदीपान्तानुपचारान्समर्पयेत् ॥ ॥ अथावाहनमंत्राः भगवन्ना
दित्यग्रहाधिपतेकाश्यपगोत्रकलिंगदेशेश्वरजपापुष्पोपमांगद्युतेद्विभु
जपद्माभयहस्तसिंदूरवर्णांबरमाल्यानुलेपनउज्वलन्माणिक्यखचित
सर्वांगाभरणभास्करतेजोनिधेत्रिलोकप्रकाशकत्रिदेवतामयमूर्तेन
मस्तेसप्ताश्वारुणध्वजपताकोपशोभितेनसप्ताश्वरथवाहनेनमेरुंप्र

(31)

दक्षिणीकुर्वन्नागच्छ। ॐ निरुद्धाभ्यांसरूपपद्मकर्णिकायांताम्रप्रतिमांप्राङ्मुखीं
वर्तुलपीठेध्यितिष्ठपूजार्थंत्वामावाहयामि भगवन्सोम द्विजाधिपतेसु
धामयशरीरात्रेयगोत्रयामुनदेशेश्वरगोक्षीरधवलांगकांते द्विभुजगदा
वरदानां कितशुक्लांबरमाल्यानुलेपनसर्वांगामुक्तमौक्तिकाभरणरम
णीयसमस्तलोकाप्यायकदेवतास्वाद्यमूर्तेनमस्तेसन्नद्धधवलध्वजपता
कोपशोभितेनदशश्वेताश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छ। ॐ
रूमयाचसरूपपद्माग्नेयदलमध्येस्फाटिकप्रतिमांप्रत्यङ्मुखींचतुरस्रपी
ठेध्यितिष्ठपूजार्थंत्वामावाहयामि भगवन्नंगारकाग्न्याकृतेभरद्वाजगोत्रा
वंतिदेशेश्वरंज्वालापुंजोपमांगद्युतेचतुर्भुजशक्तिशूलगदाखड्गांगधारि
नूरक्तांबरमाल्यानुलेपनप्रवालाभरणभूषितसर्वांगदुरालोकदीप्तेनम
स्तेसन्नद्धरक्तध्वजपताकोपशोभितेनरक्तमेषरथवाहनेनमेरुंप्रदक्षि
णीकुर्वन्नागच्छ। ॐ भूमिस्कंदाभ्यांसरूपपद्मदक्षिणदलमध्येरक्तचंदनप्रति
मांदक्षिणामुखींत्रिकोणपीठेध्यितिष्ठपूजार्थंत्वामावाहयामि भगवन्सौ

(३२)

म्यसौम्यालंकृते सर्वज्ञानमयात्रेयगोत्र मगधदेशेश्वर कुंकुमवर्णांग द्युतेचतुर्भु
जखड्गखेटगदावरदानां कित पितांबरमाल्यानुलेपन मरकताभरणालंकृ
त सर्वांग विबुद्धमतेनमस्तेसन्नद्धपीतध्वजपताकोपशो भितेन चतुः सिंह
रथवाहनेननमेरुंप्रदक्षिणीकुर्वन्नागच्छ विष्णुपुरुषाभ्यांसरूपैशानदलमध्ये
सुवर्णप्रतिमामुदङ्मुखीबाणाकारपीठेधितिष्ठपूजार्थंत्वामावाहयामि भग
वन्बृहस्पते समस्तदेवाचार्यांगिरसगोत्र सिंधुदेशेश्वर दीप्तसुवर्णसदृशां
गकांतिचतुर्भुजेदंडकमंडलुवक्षसूत्रवदानांकित पितांबरमाल्यानुलेपन
पुष्परागमयाभरणरमणीय समस्तविद्याधिपतेनमस्तेसन्नद्धपीतध्वज
पताकोपशोभितेनपीताश्वरथवाहनेननमेरुंप्रदक्षिणीकुर्वन्नागच्छेंद्र
ब्रह्मभ्यांसरूपपौत्तरदलमध्येसुवर्णप्रतिमामुदङ्मुखीदीर्घचतुरस्रपीठेधि
तिष्ठपूजार्थंत्वामावाहयामि भगवन्भार्गव समस्तदैत्यगुरो भार्गवगोत्रभो
जकटदेशेश्वर रजतोज्वलांगकांतेचतुर्भुजदंडकमंडलुवक्षसूत्रवरदानां
कित शुक्लांबरमाल्यानुलेपनवज्राभरणभूषित सर्वांग समस्तनीतिशास्त्र

(33)

निपुणामतेनमस्तेसंनद्धशुक्लध्वपताकोपशोभितेनशुक्लाश्वरथवाहनेनमस्ते
प्रदक्षिणीकुर्वन्नागच्छेंद्राणींद्राभ्यां सहपद्मपूर्वदलमध्येरजतप्रतिमांप्राङ्मु
खींपंचकोणपीठेऽधितिष्ठपूजार्थंत्वामावाहयामिभगवन्शनिश्चरभास्क
रतनयकाश्यपगोत्रसौराष्ट्रदेशेश्वरकज्जलनीलांगकांतेचतुर्भुजचारूपिणि
रकृपाणाभयांकितनीलांबरमाल्यानुलेपननीलरत्नभूषणालंकृतसर्वां
गसमस्तभुवनेभीषणामर्षमूर्तेनमस्तेसन्नद्धनीलध्वजपताकोपशोभि
तेननीलगृध्ररथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छप्रजापतियमाभ्यांस
हपद्मपश्चिमदलमध्येकालायसप्रतिमांप्रत्यङ्मुखींचापाकारपीठेऽधि
तिष्ठपूजार्थंत्वामावाहयामिभगवन्राहोरविसोममर्दनसिंहिकानंदनपै
ठीनसगोत्रबर्बरदेशेश्वरकालमेघसमुद्युतेव्याघ्रवदनचतुर्भुजखड्गच
र्मशूलवरदानांकितकृष्णांबरमाल्यानुलेपनगोमेदिकाभरणभूषितस
र्वांगसौंदर्यनिधेनमस्तेसंनद्धकृष्णध्वजपताकोपशोभितेनकृष्णसिंहर

35

॥९७॥

थवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छ सर्पकालाभ्यां सहपद्मनैर्ऋतदलम
ध्येसीसकपत्र तिमांदक्षिणामुखंवीशूर्पाकारपीठेध्यितिष्ठपूजार्थंत्वामा
वाहयामि भगवन्केतोकामरूपजैमिनिगोत्रमध्यदेशेश्वर धूम्रवर्णध्व
जाकृते द्विभुजगदावरदान्वितचित्रांबरमाल्यानुलेपनवैडूर्यमयाभ
रणभूषितसर्वांगचित्रध्वजकेनमस्तेसंनद्धचित्रपताकोपशोभितेन चित्र
कपोतरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छ ब्रह्म चित्रगुप्ताभ्यां सहपद्म
वायव्यदलमध्येकांस्यपत्र तिमांदक्षिणामुखंवीध्वजाकारपीठेध्यितिष्ठपूजा
र्थंत्वामावाहयामि ॥५॥ अथ ग्रहाणामधिदेवताग्रस्याधिदेवतावाहनं
पिंगभ्रूश्मश्रुकेशंपिंगाक्षं त्रिनयनमरुणवर्णंछागस्थं साक्षसूत्रंसप्तार्चि
षंशक्तिधरं वरदहस्तद्वयमादित्याधिदेवमग्निमावाहयामि त्रिलोचनं
पंचवक्त्रंवृषारूढंकपालशूलखट्वांगधारिणंचंद्रमौलिंसदाशिवमा
दित्यप्रत्यधिदेवंरुद्रमावाहयामि स्त्रीरूपधारिणीः श्वेतवर्णामकर
वाहनाःपाशकलशधारिणीर्मुक्ताभरणभूषिताःसोमाधिदेवताआ ॥९७॥

३५

पञ्चावाहयाम्यक्षसूत्र[illegible]कमलदर्पणकमंडलुधारिणीं त्रिदशपूजितां सोम
ग्रहस्याधिदेवतामुमामावाहयामि शुक्लवर्णां दिव्याभरणभूषितां चतुर्भुजां सौ
म्यवपुषां चंडांशुसदृशांबरां रत्नपात्रसस्यपात्रौषधिपात्रपद्मोपेतकरां चतु
र्दिङ्नागपृष्ठगतामंगारकाधिदेवतां भूमिमावाहयामि षण्मुखं शिखंडक
विभूषिणं रक्तांबरधरं मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतं चतुर्भुजमं
गारकप्रत्यधिदेवं स्कंदमावाहयामि कौमोदकीपद्मशंखचक्रोपेतं चतुर्भुजं
सौम्याधिदेवं विष्णुमावाहयामि सौम्यप्रत्यधिदेवं विष्णुवत्पुरुषमावाहया
मि चतुर्दंतगजारूढं वज्रांकुशधरं प्राचीपतिं नानाभरणभूषितं बृहस्पत्य
धिदेवमिंद्रमावाहयामि पद्मासनस्थं जटिलं चतुर्मुखमक्षमालास्रुवपु
स्तककमंडलुधारिणं कृष्णाजिनवाससं पार्श्वस्थितहंसं बृहस्पतिप्रत्य
धिदेवं ब्रह्माणमावाहयामि संतानमंजरीवरदानधरद्विभुजां शुक्राधिदे
वतामिंद्राणीमावाहयामि चतुर्दंतगजारूढं वज्रांकुशधरं प्राचीपतिं नानाभ
रणभूषितं भार्गवप्रत्यधिदेवमिंद्रमावाहयामि यज्ञोपवीतिनं हंसस्थमेकव

38

क्रमक्षमालास्रुवपुस्तककमंडलुसहितंचतुर्भुजंब्रह्मेश्वराधिदेवप्रजापतिमा
वाहयामिर्धूम्रवर्णंदंडहस्तंरक्तसदृशांबरधरंकृष्णवर्णमहिषारूढंसर्वाभ
रणभूषितंब्रह्मेश्वरग्रहस्याधिदेवंयममावाहयाम्यक्षसूत्रधरान्कुंडलि
काकारपुच्छयुक्तानेकभोगांश्चिभोगान्भीषणान्राह्वधिदेवतासर्पा
नावाहयामिकरालवदनंनित्यंगंभीषणंपाशदंडधरंसर्पवृश्चिकरोमाणंरा
ग्रस्याधिदेवंकालमावाहयामि॥पद्मासनस्थंजटिलंचतुर्मुखमक्षमालास्रु
वपुस्तककमंडलुधारिणंकृष्णाजिनवाससंपार्श्वस्थितहंसंकेत्वधिदेवंब्र
ह्माणमावाहयामिउदीच्यवेषधरंसौम्यदर्शनंलेखनीपत्रोपेतंद्विभुजं
केतुग्रहस्याधिदेवंचित्रगुप्तमावाहयामि॥६॥अथसाद्गुण्यदेवतावाह
नंब्रह्मनेर्वायुग्रदेवेभ्यःसर्वत्रसप्रणवव्याहृतिपूर्वकंत्रिनेत्रंगजाननंनागयज्ञो
पवीतिनंचंद्रधरंदंताक्षमालापरशुमोदकोपेतंचतुर्भुजंविनायकमावा
हयामितद्दत्तरतःशक्तिबाणशूलखड्गचक्रचंद्रबिंबखेटकपालपरशु
टंकोपेतदशभुजांसिंहारूढांदुर्गारव्यदैत्यासुरहारिणींदुर्गामावाहयामि

37

ह्यामवर्णं त्रिलोचनं मूर्ध्वकेशं सुदंष्ट्रं भ्रुकुटीकुटिलाननं नूपुरालंकृतं। विस
र्पमिखलयायुक्तं सर्पांगमतिक्रुद्धं क्षुद्रघंटावनद्धं गुल्फावलंबिन्टकरोटि
कामालाधारिणमुरगकौपीनं चंडमौलिं दक्षिणहस्ते शूलवेतालखड्गडुंडु
भीं दधानं वामहस्तैः कपालघंटाचर्मचापान् दधानं भीमं दिग्वाससमभितद्यु
तिं क्षेत्रपालमावाहयामि। ध्यावद्धारिणा पृष्ठगतं ध्वजवरदानधारिणं धूम्रवर्णं
वायुमावाहयामि। नीलोत्पलाभं नीलांबरधारिणं चंद्रार्कोपेतं द्विभुजं षष्ठे
माकाशमावाहयामि। ओषधिपुस्तकोपेतदक्षिणवामहस्तावन्योन्यसंयु
क्तदेहावेकस्य दक्षिणपार्श्वे परस्य वामपार्श्वे रत्नभांडकरं शुक्लांबरधारि
णौ नारीयुग्मोपेतौ देवभिषजावश्विनावावाहयाम्यथ संरक्षकं इंद्रादिलो
कपाला वाहनं स्वर्णवर्णं सहस्राक्षं वज्रपाणिं प्राचीप्रियं इंद्रमावाहयामि
स्वर्णवर्णं सप्तार्चिषं सप्तहस्तं त्र्यक्षं यं नस्रुक्स्रुवतोमरव्यंजनघृतपात्राणि
दधानं स्वाहाप्रियं मेषवाहनमग्निमावाहयामि। रक्तवर्णं दंडधरं महिष
वाहनं मिलाप्रियं यममावाहयामि। नीलवर्णं खड्गचर्मधरमूर्ध्वकेशं नरवाह

॥३९॥

नकालिकाधिपं निर्ऋतिमावाहयामि रक्तभूषणं नागपाशधरं मकरवाहनं पद्मि
नीधिपं सुवर्णवर्णं वरुणमावाहयामि धूम्रवर्णं हेमदंडधरं कृष्णमृगवाहनं जगत्प्रा
णरूपं मोहिनीधिपं वायुमावाहयामि स्वर्णवर्णं निधीश्वरं कुंतपाणिमश्ववाह
नं चित्रिणीधिप कुबेरमावाहयामि शुद्धस्फटिकवर्णं वरदाभय शूलाक्षसूत्रध
रं वृषवाहनं गौरीधिपमीशानमावाहयामीति पूर्ववत्संपूजयेत्॥ ७॥ अथाग्नि
मुपसमाधाय सहस्त्रैर्बिल्वैः समिद्भिर्वाज्याक्तैः प्रत्येकं श्रौतेकाचराभिः सहस्रपरा
भिराहुतिभिर्निमित्तमन्त्यपेक्षयाजुहुयात्प्रधानदशांशेन पार्श्वदेवतयोस्तद्द्वे
नेतरेषां स्वाहांतैर्नामभिर्होमस्तल्लिंगमंत्रैर्वासरुद्रवदानेन चरुहोमः पाणिना
घसूतां स्तिलांश्च व्याहृतिभिर्हुत्वा प्राक्स्विष्टकृतो गणानां घंटादिनूपुरैर्विरूपहारा
नुपगृह्य सपुष्पाणि रत्नानि निवेदयेत् भावे सुवर्णपुष्पाणि तां नमस्कृत्य प्रसीदंतु
भवंतु इति प्रसाद्य होमं समापयेत्सयदिमंत्रे रिक्तः स्यादेते मंत्रा भवंत्या रुद्रेन रज
सा वर्तमान आप्यायस्व समेतु ते अग्निर्मूर्धा दिवः ककुद् उध्यध्वं समनसः सखा
यो बृहस्पते अति यदर्यो अत्र हाष्णुक्रंते अन्यघ जंतं ते अन्यपछ म अग्निरग्निभिः

करत्क्रयानश्चित्रआभुवत्केतुंकृण्वन्नकेतवइतिग्रहाणामग्निंदूतंवृणीमहेइममेसो
मोअब्रवीत्स्योनापृथिवीभवेदंविष्णुर्विचक्रमइंद्रश्रेष्ठानिद्रविणानिधेहीन्द्राणी
मासुनारिषुप्रजापतेनत्वदेतान्यन्यआयंगौःपृश्निरक्रमीद्रुसजन्मातरंप्रथमंपुर
स्तादित्यधिदेवतानांत्र्यंबकंयजामहेगौरीर्मिमायसलिलानितक्षतिकुमारश्चि
त्पितरंवंदमानंसहस्रशीर्षापुरुषाब्रह्मणातेब्रह्मयुजायुनज्मीइंद्रमिद्देवतातयेयमा
यसोमंसुनुतपरंमृत्योअनुपरेहिपंथांसचित्रचित्रंचितयंतमस्मेइतिप्रत्यधिदे
वतानामातृनंइद्रक्षुमंतंजातवेदसेसुनवामसोमंक्षेत्रस्यपतिनावयंक्राणाशिशु
र्महीनांमादित्प्रत्नस्यरेतसोश्विनावर्त्तिरस्मदितिसाद्गुण्यदेवतानामिंद्रोविश्व
तस्पर्यग्निमीळेपुरोहितंयमायसोमंसुनुतमोषुणःपरापरोदुत्तमंमुमुग्धिनस्त
ववायवृतस्पतेत्वंनःसोमविश्वतःकद्रुद्रायप्रचेतसइतिलोकपालानां॥८॥अथ
यजमानाभिषेकोग्रहवेदेःप्रागुदीच्यांशुचौदेशेसंमृष्टालंकृतेप्राक्प्रवणेचतु
ष्पादंदीर्घचतुरस्रंसोत्तरच्छदंनिधायतत्रोदग्गांदर्भानास्तीर्यप्राङ्मुखंकर्त्तारंस
त्यमुपविश्याचार्यःसऋत्विग्भिरभिषेककुंभमादायप्रत्यङ्मुखस्तिष्ठन्नौदुंबर्या
ईयाश्वत्थवयासपलाशयासहिरण्यपवित्रयासकुशदूर्वयांतर्धायकुंभोदकप

षड्भिरभिषेचयेत् लिंगाभिर्वारुणीभिः सुरास्त्वाभिः पावमानीभिरन्याभिः शुभां
तिपवित्रलिंगाभिषेकविहिताभिरद्भिः सुरास्त्वाभिति सूक्तेन श्रीसूक्तेनेमा
आपः शिवतमा इति त्वं चेन्नो देवस्यत्वेति च यजुषा भूर्भुवः स्वरिति च व्याहृतिभिर
भिषिक्तस्तेभ्यो गृहोक्तां दक्षिणां दद्यात् सवत्सां गां गौर्हि सोरक्तो नद्वा हिरण्यं पी
तं वासः श्वेतोश्वः कृष्णो गौः कालायसं हस्ती छागो वेति हीनां पुनर्हिरण्येन संमि
तां कुर्यादभावे सर्वेषां हिरण्यमेव वा तुष्टिकरं दद्याद्द्विगुणमाचार्यायान्नघृतान्नै
न ब्राह्मणान्भोजयित्वा शान्तिः पुष्टिस्तुष्टिरस्त्विति वाचयेत् संबन्धिज्ञातिबान्धवां
श्च तोषयेदेष ग्रहयज्ञः सर्वारिष्टप्रशमनः सर्वपुष्टिकरः सर्वाभीष्टकरस्तस्मा
देनं वैभववान्विशेषतः कुर्यादथ वैभवशान्तिपुष्टिकामो यथोपपत्तिं कुर्यात् ॥१॥
अथ होमो ग्रहग्रहश्चैत्ययज्ञो गृहस्थो वा ग्रहग्रहरिष्टान्देवानिष्टाभीष्टार्थाश्चिन्नो
तितस्यते ग्रहग्रहश्चैत्यांस्मे गणपतिर्वा स्कंदो वा सूर्यो वा सरस्वती वा गौरी वा गौ
रीपतिर्वा श्रीपतिर्वान्यो वाभिमतस्त एवायथारुचि समस्ता वर्ज्यंते केचिद्ग
णपतिमादित्यं शक्तिमच्युतं शिवं पंचममेकमेव वा ग्रहः पूजयेत्तेतान्प्रभु वागंनो
वा सूर्ये वा स्वहृदये स्थंडिले वा प्रतिमासु वा यजेत प्रतिमासु वा यजेत प्रति

(51)

मास्वद क्षिणका सुनावाहन विसर्जने भवतः स्वाकृतिषु कृिमूस्तासु नित्यं सं नि
कृतो रुद्रिः प्र तिमां प्राङ्मुखी प्रत्यङ्मुखो वायजेतान्यत्र प्राङ्मुखः संभृत संभारं
यजन भवन मेत्यद्वारदेशे स्थित्वाहस्तताल त्रयेणापसर्पं तु ये भूताये भूता
दि विसंस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञये ति विघ्नानुद्धास्य प
वित्रं यये श्योमातामधुम इत्यन्वेतपत्यस्या पवित्रे विश्वेदेवायरछछ इति जपित्वा
शुचावासने उपविश्य पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च
धारयमां नित्यं पवित्रं कुरु चासन मित्युपविश्याय तप्राणः कर्मसंकल्प्य शुचि
न्तोरवादि पात्रं सपवित्रम द्भिः प्रणवेन पूरयित्वा गंधाक्षत पुष्पाणि प्रक्षिप्य
सावित्र्याभिमंत्र्यतीर्थान्यावाह्याभ्यर्च्य पवित्रपाणिस्तदुदकेनापो हिष्ठी
याभिरात्मानमायतनं यजनांगानि चाभ्युक्ष्य क्रियांगोदकं भगंधादि भि
रभ्यर्च्य तेनोदकेनाव तीर्थान्कुर्वत्ति नमोंत नाम्नात ल्लिंगमंत्रेण वा क्रमेणोप
चारानूदद्यात्सुष्पोदकेन पाद्यमर्घ्यं च पात्रांतरेण सगंधाक्षत कुसुमं दद्या
दावाहनमासनं पाद्यमर्घ्यमाचमनीयं स्नानमाचमनं वस्त्रमानि गंधपुष्पा

॥२३॥

णधूपदीपमुपहारं मुखवासं स्तोत्रं प्रणामं प्रादक्षिण्यं विसर्जनं च कुर्यादसंप
न्नं मनसा संपादयेदाचमनेन पृथगुपचारः प्रणामस्तोत्रांगं प्रादक्षिण्यं वि
सर्जनांगं प्रथम मंत्रं गणानां त्वा गणपतिं हवामह इति गणपतेः कुमारश्च
सितरं वंदमानमिति स्कंदस्याकृष्णेन रजसा वर्तमान इत्यादित्यस्य पावका
नः सरस्वतीति सरस्वत्याः जातवेदसे सुनवाम सोममिति दुर्गायै त्र्यंबकं यजा
मह इति रुद्रस्य गंधद्वारामिति श्रियः इदं विष्णुर्विचक्रम इति विष्णोः केचित्षो
डशोमानुपचारानेतौ रूपेणैव सूक्तेन प्रत्यृचं सर्वत्रैव प्रयुंज्यंते अन्ये सावित्र्या वा
जातवेदस्यैषा वा प्राजापत्यया वा व्याहृत्या वा प्रणवेनैव वा कुर्वंति स एष देवय
ज्ञो गृहस्थो गोदानसंमितः सर्वाभीष्टप्रदः स्वर्गापवर्गदश्चातस्मादेनं गृहस्थः
कुर्वीत तमेनं वैश्वदेव हुतशेषेणाऽपृथगनेन वा कुर्यान्नास्य शेषेण वैश्वदेवं कु
र्यात् ॥३०॥ अथास्य शेषेण गृहदेवतानां बलिर्द्वारे पितामहाय प्रकीर्णे गृ
ह्याय धगृहे प्राचीं दिशमारभ्य प्रतिदिशं सनवग्रहाय इंद्राय बलभद्राय यय
म विष्णुभ्यां स्कंदवरुणाभ्यां सोमसूर्याभ्यां मश्विभ्यां वसुभ्यो नक्षत्रेभ्यो ॥२३॥

42

थमध्येवास्तोष्पतये ब्रह्मणे च। अग्ना। द्विक्षिणमूलेषु सध्ये वृक्षे श्रियै ककाः र्येव स
णायोदधाने भ्विभ्यां दृषदुपलयोर्द्यावापृथिवीभ्यामुलूखलमुसलयोरथ
निष्क्रम्य भूमावप आसिच्य श्वचांडालपतितभूतवायसेभ्योन्नं भूमौ विस्कि
रेद्ये भूताः प्रचरंति दिवानक्तं बलिमिच्छंतो विदुरस्य प्रेष्ठास्तेभ्यो बलिं पुष्टि
कामो हरामि मयि पुष्टिं पुष्टिपतिर्ददात्विति रात्रौ चेन्नक्तं बलिमिति ब्रूयादथ
प्रक्षालितपादपाणिराचम्य ग्रामं तां पृथिवी द्यावमंतरिक्षं द्यौर्नो दिव्य भयं नो
अस्तु॥ द्यावा दिवः प्रदिशः उद्दिशो न आपो विश्वतः परिपांतु विश्वत इति ज
पित्वान्यानि च स्वस्त्ययनानि ततो मनुष्ययज्ञपूर्वकं भुंजीत॥ ५३॥ अथ भो
जनविधिरार्द्रपाणिराचांतः पवित्रपाणिः शुचौ देशे प्रत्यङ्मुखः प्राङ्मुखो वो
पविश्य चतुरस्रमंडले पात्रस्थमन्नं प्रणवव्याहृतिपूर्वया सावित्र्याभ्युक्ष्य स्वा
दो पितामहो पित विद्य भिमंत्र्य सत्यं त्वर्त्तेन परिषिंचामीति दिवा परिषिंचे
दृतं त्वा सत्येन परिषिंचामीति रात्रावथ दक्षिणतो भुवि भूपतये भुवनपतये
भूतानां पतय इति नमोंतैः त्रीन्ग्रासं संग्रहस्य कृसं संख्याबलिं विकीर्य समाहि

२५

२२

तोमृतोपस्तरणमसीत्यपःप्राश्यसव्येनपाणिनापात्रमालभ्यतर्जनीमध्य
मांगुष्ठैःप्राणायमध्यमानामिकांगुष्ठैरपानायानामिकाकनिष्ठांगुष्ठैर्व्याना
यकनिष्ठतर्जन्यंगुष्ठैरुदानायसर्वाभिरंगुलीभिःसमानायचमुखेजुहुया
त्सर्वाभिरेवनासर्वैर्भ्योजुहुयादेवंवाग्यतोभुक्त्वामृतापिधानमसीत्यपि
धानंप्राश्यसंशोधितमुखपादपाणिर्द्विराचामेदेवंभुंजानोग्निहोत्रफलमश्नु
तेबलपुष्टिमान्भवतिसर्वमायुरेति॥६॥अत्रथास्तमितेसायंसंध्यामुक्त्व
दुपास्यहोमवैश्वदेवगृहबल्यतिथ्यर्चनेनिरुत्यायदिदिवोदितकर्माणिअ
कृतानियावत्कुर्यात्तावत्क्रमेणसर्वाणिसौरवर्जयित्वाकुर्यादाक
ष्टीयेयेवार्घ्यंदत्वाद्विविष्टोषाष्टमीचतुर्दशीभानुवारेश्राद्धदिनेतत्पूर्वदिनंव
र्जयित्वादिपत्न्यासहतांबूलावशिष्टरात्रिषुनियमेनामात्यैःपरिवृतोलघु
भोजनंकृत्वासेवनंकृत्वासंध्यायांशून्यालयेश्मशानेचैकवृक्षेचतुष्पथे
शिवमातृकायक्षनागस्कंदभैरवाद्युग्रदेवगृहेषुधान्यगोदेवविप्राग्निगु
रूणामुपरिच्छायाशुचौदेशेअशुचिरार्द्रवस्त्रपादोनग्नःशयनंनकुर्याद्रात्रीव्य

48

रुपदायतीतिसूक्तंजपित्वाप्राक्शिरसादक्षिणतःशिरोवेष्टदेवतानांनमस्कृत्वास्मरणंच
कृत्वावैणवंदंडमुदकपात्रंशयनसमीपेनिधायप्रक्षालितपादःशयनंकुर्यात्प्रदोषेपरयामौ
विद्ययातिक्रम्याथप्रभातेष्टदेवतानांनमस्कृत्वानदहःकृत्वासंस्मृत्वाधर्मशास्त्रोक्तविधिनामूत्रपु
रीषोत्सर्गादिकुर्यात् १४ अथश्राद्धानितान्यष्टौपार्वणंपूर्वेद्युरष्टम्यामन्वष्टक्यंमासिमासि
काम्यमाभ्युदयिकमेकोद्दिष्टंपार्वणंचेतिपर्वामावास्यातत्रभवंपार्वणंतदाहिताग्निःपिंडपि
तृयज्ञंकृत्वाकरोत्यनाहिताग्नेस्तुतद्व्यतिरेकेणप्रतिषज्यतेयथादौपितृयज्ञोयावदिध्माधानाद
थपार्वणंब्राह्मणपादप्रक्षालनाद्याछादनांतंपुनःपितृयज्ञआमेक्षणानुप्रहरणात्पुनःपार्वणमा
तृप्तिप्रश्नादथोभयशेषंक्रमेणसमापयेदित्येषप्रतिषंगस्तमिममुदाहरिष्यामःपितृयज्ञे
पराह्णेग्निमुपसमाधायतस्यैकमुल्मुकंप्राग्दक्षिणाप्रणयेद्येरूपाणिप्रतिमुंचमानाअसु
राःसंतःस्वधयाचरंति परापुरोनिपुरोयेभरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मादितिसोग्निरति
प्रणीतोभवतितंचोपसमाधायोभौप्राग्दक्षिणाग्रैर्दर्भैःपरिस्तृणीयात्सर्वकर्माणीहप्राग्द
क्षिणांगमयेदथौपासनाग्नेःप्रागुदक्प्रत्यगुदग्वाप्राग्दक्षिणाग्रान्दर्भानास्तीर्यैकैकशःपा
त्राणिप्रयुनक्तिचरुस्थालींशूर्पंस्फ्यमुलूखलमुसलंस्रुवंध्रुवंकृष्णाजिनंसकृदाछिन्नमिध्म

९६

मेक्षणं कमंडलुमिति दक्षिणतो व्रीहिमशकटं भवति शूर्पं स्थालीं प्रगृह्य दक्षिणतः शक
टमारुह्य स्थालीं व्रीहिभिः पूरयित्वा शूर्पेनिमृज्य शूर्पं पातितां छकटे प्राश्य स्थालि स्थान्कृ
ष्णाजिनोलूखलं कृत्वा पत्न्यवहंन्यादविवेचमवहतान्सकृत्प्रक्षाल्यौपासनेश्रपयेदर्वाग
ति प्रणीतास्फ्येन प्राग्दक्षिणायतां लेखामपहता असुरा रक्षांसि वेदिषद इत्युल्लिख्यता
मभ्युक्ष्य सकृदाच्छिंनेन बर्हिषावास्तीर्य विलीनानुत्पूतमाज्यं दक्षिणतो निधाय स्रुवेण
स्थालीपाकमभिघार्योदगुद्वास्य प्रसगति प्रणीतादासाद्य दक्षिणत आंजनाभ्यंजनकशि
पूपबर्हणानि चैतदंतं पिंडपितृयज्ञं कृत्वा पार्वणमारभेत् १५ अथ हविरर्हान्ब्राह्मणान्दे
वे द्वौ त्रीपित्र्ये कैकं वोभयत्र शक्तावेकस्याने कान्वाकाले निमंत्रितान्स्नातान्स्वागतेनाभिपू
ज्य प्राच्यां शुचौ देशे गृहाजिरे गोमयांभसा चतुरस्रमुत्तरं वर्तुलं दक्षिणं मंडलद्वयमुपलिप्य
प्रागग्रांदर्भान्सयवानुत्तरे प्राश्य दक्षिणाग्रासतिलानीतरत्रोभेभ्यर्च्य ब्राह्मणान्यथोद्देशं
यथावयः पित्र्ये जायांसं दैवे कनीयांसमुभयत्र दक्षिणेनाविनियुज्याथ प्रत्यङ्मुख उत्तरे मंड
ले दैवे विनियुक्तयोर्यवांभसा पाद्यं दत्वा शुद्धेन शंनो देव्या पादान्प्रक्षाल्य दक्षिणे चेतरेषां
प्राचीनावीती तिलांभसा पाद्यं दत्वा तथैव प्रक्षालयेदथ तानुदक्द्विराचांतानुद्दिष्टकृ

पांध्यायन्परिश्रिते दक्षिणाप्रवण ऽउपालिसे गृहे दैवे प्राङ्मुखावुदगपवर्गे दक्षिणतः
पित्र्यउदङ्मुखान्प्रागपवर्गमुपवेश्याचान्तोयज्ञोपवीती प्राणानायम्यकर्मसंकल्प्यदैवे
सर्वमुपचारउदङ्मुखोयज्ञोपवीती प्रदक्षिणंकुर्यात्पित्र्ये प्राग्दक्षिणाभिमुखः प्राचीनावी
तीप्रसव्यमथतिलहस्तः प्राचीनावीती प्रसव्यमपहताअसुरारक्षांसिपिशाचायेक्षयंतिपृ
थिवीमनुअन्यत्रैतोगछंतुयत्रैतेषांगतंमनइतिसर्वतस्तिलैरवकीर्योदीरतामवरउत्परास
इतिजपित्वादर्भाभिसांनान्यभ्युक्ष्यगयांजनाईनंवस्वादिरूपान्पितृंध्यात्वाथप्रथमंदेवेब्रा
ह्मणहस्तयोरपोदत्वायुग्मानृजून्प्रागग्रांदर्भान्विश्वेषांदेवानामिदमासनमित्येकैकस्या
सनेदक्षिणतः प्रदायापोदद्यादेवंसर्वोपचारेष्वाद्यंतयोरपोदद्यादथाभ्युक्षितायांभुवि
प्रागग्रांदर्भानास्तीर्यतेषुन्यग्बिलंपात्रमासाद्योत्तानंकृत्वातस्मिन्प्रागग्रदर्भयुग्मांत
र्हितपआसिंच्यशंनोदेव्यानुमंत्र्ययवोसिधान्यराजोवावारुणोमधुसंस्रुतः निर्णोदः सर्व
पापानांपवित्रमृषिभिस्मृतमितियवानोप्यगंधादीनिचाक्षिप्यादेवपात्रंसंपन्नमित्याभिम
श्ययवहस्तोविश्वांदेवानावाहयिष्यामीत्युक्त्वाताभ्यामावाहयेत्युक्तोविश्वेदेवासआग
तेतिपादादिमूर्द्धांतंसव्यसंस्थंतयोर्यवानवकीर्यागछंतुमहाभागाविश्वेदेवामहाबलाः

येअत्रविहिताश्श्राद्धेसावधानाभवंतुतइत्सुपरूणायस्वाहार्घ्योंइत्सर्घ्यमुभयोःसंकूंनिवे
द्यप्रथममन्याअपोदत्वार्घ्यादर्घ्यमादायविश्वेदेवाइदंवोअर्घ्यमितिदत्वायादिव्याऽआपः
पृथिवीसंबभूवुर्याअंतरिक्ष्याउतपार्थिवीर्याः हिरण्यवर्णायज्ञियास्तानआपःशंस्योना
भवंत्वित्सनुमंत्र्यैवंद्वितीयस्यापिशेषंदत्वानुमंत्र्यगंधपुष्पधूपदीपान्नुभयोर्द्विर्द्विर्दत्वाछाद
नंदद्यादर्चनविधेःसंपूर्णतांवाचयित्वापित्र्यर्चनायानुज्ञातःप्राचीनावीतीप्राग्दक्षिणा
भिमुखःपित्र्यर्चनंकुर्यात् १६ पितरःपितामहाःप्रपितामहाइतित्रयस्तेषांप्रत्येकमेक
वद्वाबहुवद्वानिर्देशंकुर्यादपोदत्वादर्भाद्द्विगुणभुग्नानयुग्मांदक्षिणाग्रान्गोत्रनामभ्यां
पितॄणामिदमासनमित्येवमासनेषुसव्यतोदद्याडक्तमपादानमथभुवमभ्युक्ष्यदक्षिणा
